मखानलः, पुं, (मखस्य अनलः मखसाध्योऽनल इत्यर्थः ।) यज्ञाग्निः । तत्पर्य्यायः । महावीरः २ । इति त्रिकाण्डशेषः ॥

मखान्नं, क्ली, (मखे मखकाले भोज्यमन्नम् ।) खाद्यबीजभेदः । माखाना इति भाषा ॥ तत्पर्य्यायः । पद्मबीजाभम् २ पानीयफलम् ३ ।
"मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्द्दिशेत् ।"
इति भावप्रकाशः ॥

मखासुहृत्, [ द् ] पुं, शिवः । मखस्य दक्षयज्ञस्य असुहृत् शत्रुः नाशक इत्यर्थः । इति हेमचन्द्रः । २०० ॥

मग इ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ मङ्गति । इति दुर्गादासः ॥

मगधः, पुं, (मगि+अच् । पृषोदरादित्वान्निष्पन्नः । मगं दोषं दधाति । धा+"आतोऽनुपसर्गे ।" ३।२।३। इति कः । यद्वा, कण्ड्वादिमगध+अच् ।) कीकटदेशः । अधुना वेहाराख्यदेशस्य दक्षिण भागः । तद्देशस्थे पुं भूम्नि । इति शब्दरत्नावली ॥ (यथा, महाभारते । ८ । ३५ । ४८ ।
"इङ्गितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोशलाः ।
अर्द्धोक्ताः कुरुपाञ्चालाः शाल्वाः कृत्स्नानुशासनाः ॥" )
बन्दी । इति हेमचन्द्रः । ७६५ ॥

मगधा, स्त्री, (मगधस्तन्नामा देश उत्पत्तिस्थानत्वेनास्त्यस्या इत्यर्शं आदिभ्योऽच् । स्त्रियां टाप् ।) पिप्पली । इति रत्नमाला ॥ (यथा, सुश्रुते कल्पस्थाने सप्तदशाध्याये ।
"हरेणुमगधाजाजि मञ्जिलायस्तदन्वितम् ॥")

मगधेश्वरः, पुं, (मगधस्य तदाख्यदेशस्येश्वरः ।) जरासन्धराजः । इति हेमचन्द्रः ॥ मगधदेशाधिपमात्रे च ॥ (यथा, रघौ । ६ । २० ।
प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा ।" )

मगधोद्भवा, स्त्री, (मगधे उद्भवो यस्याः ।) पिप्पली । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते कल्पस्थान एकादशाध्याये ।
"फलं इहत्या मगधोद्भवाना-
मादाय कल्कं फलपाककाले ।" )
मगधदेशजाते त्रि ॥

मग्नः, त्रि, (मस्ज्+क्तः । "ओदितश्च ।" ८।२।४५। इति निष्ठातकारस्य नत्वम् । "स्कोः संयोगाद्योरन्ते च ।" ८ । २ । २९ । इति सलोपः । चोः कुत्वञ्च ।) स्नातः । जलान्तःप्रविष्टः । डोवा इति भाषा ॥ (यथा, देवीभागवते ।१।६।२५।
"केन दृष्टं कथं जातं मग्नावावां जले स्थितौ ॥")
मस्जधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः ॥

मघ, इ ङ भूषे । कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक० सेट् ।) इ, मङ्घते । इति दुर्गादासः ॥

मघ, इ ङ कैतवाद्यर्थयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-द्यूतक्रीडादौ अक०-गतौ निन्दायां आरम्भे च सक०-सेट् ।) कैतवमिह कितवक्रिया अक्षक्रीडनादिः । इ मङ्घते ङ मङ्घते अक्षैः कितवः । अन्यार्थो गतिनिन्दारम्भजवाः । कैतवजवयोरेवायमिति केचित् । इति दुर्गादासः ॥

मघः, पुं, (मघि+अच् । पृषोदरात् साधुः ।) द्वीपविशेषः । इति मेदिनी । घे, ४ ॥ देशविशेषः । स तु मग्नामकम्लेच्छानां स्थानम् ॥ पुष्पविशेषे क्ली । इति शब्दरत्नावली ॥ (क्लीं मंहनीयं धनम् । यथा, ऋग्वेदे । ७ । २१।७ ।
"इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहु
वन्तसातौ ॥"
"मघानि मंहनीयानि धनानि ।") इति तद्भाष्ये सायनः ।)

मघवती, स्त्री, (मघवत्+ङीप् । इन्द्राणी । इति मुग्धबोधव्याकरणम् ॥

मघवा, [ न् ] पुं, (मह्यते पूज्यते इति । मह-पूजायाम् । "श्वन्नुक्षन् पूषन् प्लीहन्निति ।" उणा० । १ । १५८ । इति कनिन् । निपातनात् हस्य घः अवुगागमश्च ।) इन्द्रः । इत्यमरः १ । १ । ४४ ॥ (यथा, रघौ । १ । २६ ।
दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥" )
जिनानां द्वादशचक्रवर्त्त्यन्तर्गतचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ॥ (सप्तमद्वापरस्य व्यासः । यथा, देवीभागवते । १ । ३ । २८ ।
"मघवा सप्तमे प्राप्ते वशिष्ठस्त्वष्टमे स्मृतः ।" )

मघवान्, [ त् ] पुं, (मघवत् । "मघवा बहुलम् ।" ६ । ४ । १२८ । इति पक्षे तृ-आदेशः । ऋ इत् ।) इन्द्रः । इत्यमरटीकायां रमानाथः । व्याकरणञ्च ॥ (यथा, महाभारते । ३।४५।१० ।
"एको वै रक्षिता चैव त्रिदिवं मघवानिव ॥"
दनोः पुत्रभेदः । यथा, मात्स्ये । ६ । १८ ।
"मरीचिर्मघवांश्चैव इरागर्भशिरास्तथा ।" )

मघा, स्त्री, (मह्+घः । हस्य घत्वम् ।) औषधविशेषः । इति धरणिः ॥ अश्विन्यादिसप्तविंशनक्षत्रान्तर्गतदशमनक्षत्रम् । तत्तु लाङ्गलाकृति पञ्चताराात्मकम् । गृहाकृति । इति केचित् । अस्याधिष्ठातृदेवता पितृगणः । यथा,—
"लाङ्गलाकृतिनि पञ्चतारके
चाश्विकेशि पितृभे शिरोगते ।
नीलनीरदविनिन्दिलोचने !
दृश्चिकादिगलितं कलाशतम् ।१।४०।"
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥
तत्र जातफलम् ।
कठोरचित्तः पितृमातृभक्त-
स्तीव्रस्वभावस्त्वनवद्यविद्यः ।
चेन्नक्षभं यस्य मघानघः स्या-
न्मतिः सदारातिविनाशदक्षा ॥"
इति कोष्ठीप्रदीपः ॥
मघाशब्दो बहुवचनान्तोऽपि दृश्यते । यथा,—
"कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः ।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते ॥
अपि च ।
नवोदके नवान्ने च गृहप्रच्छादने यथा ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ॥"
इति तिथ्यादितत्त्वम् ॥
एकवचनान्तप्रयोगो यथा,—
"मघायां पिण्डदानेन ज्येष्ठपुत्त्रो विनश्यति ।"
इति मलमासतत्त्वम् ॥
(अस्यां व्याधिजननेऽरिष्टत्वं यथा,—
"मघा भरणीहस्तेषु मूले वा ज्वरितोऽपि वै ।
मृत्युमाप्नोति सोऽपि नात्र कार्य्या विचारणा ॥
"नवरात्रं तथाश्लेषा मघास्वेति यमालयम् ॥"
इति हारीते द्वितीये स्थाने चतुर्थेऽध्याये ॥ )

मघात्रयोदशी, स्त्री, (मघा दशमनक्षत्रम् । मघायुक्ता त्रयोदशी । इति मध्यपदलोपी कर्म्मधारयः ।) मघानक्षत्रयुक्तभाद्रकृष्णत्रयोदशी । यथा । प्रौष्ठपद्यां कृष्णत्रयोदश्यां मघायुक्तायां अनिषिद्धयत्किञ्चिद्द्रव्येण श्राद्धमावश्यकम् । शक्तादिविधिवाक्येषु नक्षत्रविशिष्टश्रुतेः । ततश्च केवलत्रयोदशी केवलमघा श्राद्धार्थवादा अपि कॢप्तविशिष्टविधिप्रापककर्म्मणो नित्यत्वबोधका न तु केवलविध्यन्तरकल्पका गौरवात् । तथा च शङ्खः ।
"प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन च ॥"
मनुः ।
"यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥"
विष्णुधर्म्मोत्तरे ।
"प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी ।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ॥"
शातातपः ।
"पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च ॥"
अत्रान्नमात्रश्रुतेः मनुवचने यत्किञ्चित् श्रुतेश्च शङ्खोक्तपायसः फलातिशयार्थः गुणविशेषे फलविशेषः स्यादिति न्यायात् । यत्तं विष्णुधर्म्मोत्तरे ।
"मघायुक्ता च तत्रापि शस्ता राजंस्त्रयोदशी ।
तत्राक्षयं भवेत् श्राद्धं मधुना पायसेन च ।
तत्र अश्वयुक्कृष्णपक्षे । अत्र यत् श्राद्धं तन्मधुयोगेन वा अक्षयं भवेत् । अतएव मनुवचने यत्किञ्चिन्मधुना मिश्रमित्यनेन मधुमात्रयुक्तत्वमुक्तम् । अतोऽत्र सुतरां शूद्रस्याधिकारः ॥ * ॥ अत्र गजच्छायायोगे फलातिशयः । तथा कृत्यचिन्तामणौ स्मृतिः ।
"कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः ।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते ॥"
करे हस्तानक्षत्रे । कन्यादशमांशोपरि सपादत्रयोविंशांशः इति यावत् ॥ * ॥ अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकम् । यथा, श्राद्धचिन्तामणौ स्मृतिः ।
"विभक्ता अविभक्ता वा कुर्य्युः श्राद्धमदैविकम् ।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना ॥"